শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীপরমহংসস্বামিব্রহ্মানন্দ ৱিরচিতং

॥ শ্রী কমলাপত্যষ্টকম্ ॥

This document has been prepared by

Sunder Kidāmbi

with the blessings of

শ্রী রঙ্গরামানুজ মহাদেশিকন্

His Holiness śrīmad āṇḍavan śrīraṅgam

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

॥ শ্রী কমলাপত্যষ্টকম্ ॥

ভুজগতল্পগতং ঘনসুন্দরং
গরুডৱাহনমম্বুজলোচনম্।
নলিনচক্রগদাকরমৱ্যযং
ভজত রে মনুজাঃ কমলাপতিম্॥ **1**॥

অলিকুলাসিতকোমলকুন্তলং
ৱিমলপীতদুকূলমনোহরম্।
জলধিজাশ্রিতৱামকলেৱরং
ভজত রে মনুজাঃ কমলাপতিম্॥ **2**॥

কিমু জপৈশ্চ তপোভিরুতাধ্ৱরৈঃ
অপি কিমুত্তমতীর্থনিষেৱণৈঃ।
কিমুত শাস্ত্রকদম্বৱিলোকনৈঃ
ভজত রে মনুজাঃ কমলাপতিম্॥ **3**॥

মনুজদেহমিমং ভুৱি দুর্লভং
সমধিগম্য সুরৈরপি ৱাঞ্ছিতম্।
ৱিষযলম্পটতামপহায ৱৈ
ভজত রে মনুজাঃ কমলাপতিম্॥ **4**॥

ন ৱনিতা ন সুতো ন সহোদরো
ন হি পিতা জননী ন চ বান্ধৱাঃ।
ৱ্রজতি সাকমনেন জনেন ৱৈ
ভজত রে মনুজাঃ কমলাপতিম্॥ **5**॥

সকলমের চলং সচরাচরং
জগদিদং সুতরাং ধনযৌৱনম্।
সমৱলোক্য ৱিৱেকদৃশা দ্রুতং
ভজত রে মনুজাঃ কমলাপতিম্॥ **6**॥

ৱিৱিধরোগযুতং ক্ষণভঙ্গুরং
পরৱশং নৱমার্গমলাকুলম্।
পরিনিরীক্ষ্য শরীরমিদং স্বকং
ভজত রে মনুজাঃ কমলাপতিম্॥ **7**॥

মুনিৱরৈরনিশং হৃদি ভাৱিতং
শিৱৱিরিঞ্চিমহেন্দ্রনুতং সদা।
মরণজন্মজরাভযমোচনং
ভজত রে মনুজাঃ কমলাপতিম্॥ **8**॥

হরিপদাষ্টকমেতদনুত্তমং
পরমহংসজনেন সমীরিতম্।
পঠতি যস্তু সমাহিতচেতসা
ব্রজতি ৱিষ্ণুপদং স নরো ধ্রুৱম্॥ **9**॥

॥ ইতি শ্রী কমলাপত্যষ্টকং সমাপ্তম্॥